# संस्कृतसप्ताहस्य प्रतिवेदनम्

केन्द्रीय माध्यमिक शिक्षा परिषदः निर्देशानुसारं केन्द्रीय विद्यालय , भारतीय राजदूतावास , काठमाण्डू इत्यस्मिन् विद्यालये अगस्त मासस्य सप्ततारिकातः त्रयोदशतारिकापर्यन्तं संस्कृत-सप्ताहस्यायोजनं अभवत् । आयोजनस्य प्रथमे दिवसे ७.८.२०१४ तिथौ देव्याः सरस्वत्याः समक्षे दीपप्रज्ज्वालनं माल्यार्पणं च कृत्वा विद्यालयस्य यशस्वी प्राचार्या श्रीमती राधामहालक्ष्मी समारोहस्योद्घाटनं कृतवती ।




सरस्वती-वन्दनापुरस्सरं गीतापाठः अभवत् । सप्तमकक्षायाः छात्राः स्फोरकपत्राणां माध्यमेन संस्कृत-भाषायाः परिचयं कारितवन्तः। तदनन्तरं संस्कृत-साहित्यमभिलक्ष्यैका प्रश्नोत्तरी समायोजिता।




विद्यालयस्य संस्कृतशिक्षकः श्री बी.डी.आर्यः 'वर्तमाने संस्कृत-भाषायाः उपयोगिता' इति विषयमभिलक्ष्य स्वसारगर्भितविचारान् प्रस्तुतवान्। स्वकीये उद्घाटनभाषणे विद्यालयस्य प्राचार्या अभाषत् यत् संस्कृतभाषा विश्वभाषा भवितुं शक्यते । यतो हि संस्कृतभाषा मानवीयमूल्ययुक्तास्ति । अपि च विश्वबन्धुत्वभावनायाः उद्वाहिकास्ति। संस्कृतभाषायामस्माकं ज्ञान-विज्ञानयोः निधिः सुरक्षितास्ति। 'जर्मन्' देशे संस्कृतमधिकृत्य सततमनुसंधानकार्यं सततं प्रचलत्येव । कार्यक्रमस्यान्ते अष्टमकक्षायाः छात्रैः 'सम्पूर्ण विश्वरत्नम्..' इति गीतं प्रस्तुतम् । अनेन सहैव छात्रैः प्रार्थनासभायाम् सर्वे कार्यक्रमाः संस्कृतभाषायामेव प्रस्तुताः ।

८.८.२०१४ तिथौ द्वितीये दिवसे प्रार्थनासभायां अद्यतनस्य सुविचारः, छात्र-प्रतिज्ञा , वार्ताः सर्वे कार्यक्रमाः संस्कृतभाषायामेव अभवन् । प्रज्ञा प्रियू संस्कृत भाषायाः महत्त्वम् ' अधिकृत्यैका लघुवार्ता प्रस्तुतवती । दैनिकव्यवहारोपयोगिशब्दानां सूचनाफलके प्रदर्शनम् ।

११.८.२०१४ तिथौ प्रार्थनासभानन्तरं विशेषकार्यक्रमरूपेण प्रहेलिकाः प्रस्तुताः। मुनिवरविलसित ....... सुमधुरं गीतं सामूहिकरूपेण सर्वैः छात्रैः गीतम् । सप्तम्कक्षायाः कृते संस्कृतसंभाषणवर्गः आयोजितः । प्रसंगानुसारं दैनिकव्यव्हारोपयोगिवाक्यानां सूचनाफलके प्रदर्शनम् ।




१२.८.२०१४ तिथौ प्रार्थनासभानन्तरं सदनानुसारं श्लोकगायन-प्रतियोगिता' अभवत्।'आदि शंकराचार्यः' संस्कृतचलचित्रस्य प्रदर्शनमभवत् । शिक्षकाणां कृते कार्यशालैका समायोजिता संस्कृतसंभाषणवर्गश्च आयोजितः ।

१३.८.२०१४ तिथौ प्रार्थनासभानन्तरं 'साहित्यिक-क्लब' सहयोगेन संस्कृत-गीत प्रतियोगिता समायोजिता। समापन-समारोहे प्राचार्या श्रीमती राधामहालक्ष्मी विजेता-प्रतिभागिभ्यः पुरस्कारवितरणं कृतवती। शान्तिपाठेन सह समारोहस्य समापनमभवत् ।